No. २३६२
क

Title सान्ध्या

Author

Extent १२ पत्र Age

Subject धर्मशास्त्र

संख्या
नं: १३७२

नं० २२१३२४

नं पि क संख्या प. १२

सं- ॐ श्रीगणेशाय नमः अथ संध्याप्रयोगः
१ ॐ विष्णुः विष्णुः विष्णुरिति त्रिराचम्य वा
मे बहून्कुशान्दक्षिणे पाणौ सपवित्रं कु
शत्रयं च धृत्वा सप्रणवगायत्र्या शिखां
बद्ध्वा पश्चान्नाभिसुखमाचम्य ऊरुमि
त्यभिमंत्र्य पुनराचमेत् ॐ अघमर्षण
सूक्तस्याघमर्षण ऋषिः अनुष्टुप् छंदः

भाववृतंदेवतं अश्वमेधावभृथे विनियो
गः ॐ ऋतंच सत्यंचाभीद्धात्तपसोऽध्यजा
यत ततोरात्रिजायत ततः समुद्रोऽ
र्णवः समुद्रादर्णवादधि संवत्सरो अ
जायत अहोरात्राणि विदधद्विश्वस्य
मिषतो वशी सूर्याचंद्रमसौ धाता यथा
पूर्वमकल्पयत् दिवंच पृथिवीं चांतरि

सं. २

त्तमथोस्वः ततोवारिणाञ्जानं वेष्टयित्वा
सप्रणवगायत्र्यारक्षांकुर्यात् ॐकारस्यब्र
ह्माऋषिः गायत्रीछन्दोऽग्निर्देवता शुक्लो
वर्णः सर्वकर्मारम्भेविनियोगः ॐसप्त
व्याहृतीनां प्रजापतिऋषिः गायत्र्युष्णि
गनुष्टुप् बृहतीपङ्क्तिःत्रिष्टुप्जगत्यश्छ
न्दांस्यग्निर्वाय्वादित्य बृहस्पतिवरुणेन्द्र

विश्वेदेवा देवता अनादिष्टप्राणायामे विनियोगः ॐ गायत्र्या विश्वामित्र ऋषिर्गायत्री छंदः सविता देवताग्निर्मुखं उपनयने प्राणायामे विनियोगः ॐ शिरसः प्रजापति ऋषिः त्रिपदा गायत्री छंदो ब्रह्माग्निर्वायुःसूर्यो देवता प्राणायामे विनियोगः इति ऋष्यादिकं स्मृत्वा बद्धासनः संमीलित

सं. ३ नयनो मौनी प्राणायामत्रयं कुर्यात् तत्र वा
योरायानकाले पूरकनामा प्राणायामः तत्र
पद्मासं चतुर्भुजं विष्णुं नाभौ ध्यायेत् धारणका
3 ले कुंभकः तत्र कमलासनं रक्तवर्णं चतुर्मुखं
ब्रह्माणं हृदि ध्यायेत् त्यागकाले रेचकः त
त्र श्वेतं ललाटदेशे त्रिनेत्रं शिवं ध्यायेत् त्रिष्व
पि नेषु प्रत्येकं त्रिसंज्ञाभ्यासः प्रत्येक सोंका

रादिसप्तव्याहृतयः ओंकारादिसावित्री ओंकार
हृदयमध्यस्थशिरश्चेतिमंत्रः तस्यस्वरूपं ओंभूः
ओंभुवः ओंस्वः ओंमहः ओंजनः ओंतपः ओंस
त्यं ओंतत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि
धियोयोनः प्रचोदयात् आपोज्योतिरसोमृ
तं ब्रह्मभूर्भुवस्वरोम् ओंहृदयंस्थमेति ब्रह्मा
ऋषिः प्रकृतिश्छंदः आपोदेवता अपामुप

सं ४

स्पर्शने विनियोगः ॐ सूर्यश्च मामन्युश्च म
न्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां
यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां
पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु य
त्किंचिद्दुरितं मयि इदमहमापोऽमृतयोनौ
सूर्ये ज्योतिषि जुहोमि स्वाहा आपः पुन
न्त्विति विष्णुऋषिः अनुष्टुप्छन्दः आपो दे

वता अपामुपस्पर्शने विनियोगः आपः पु
नंतु पृथिवीं पृथ्वी पूता पुनातु मां पुना
तु ब्रह्मणस्पतिः ब्रह्म पूता पुनातु मां य
दुच्छिष्टमभोज्यं वा यद्वा दुश्चरितं मम सर्वं
पुनंतु मामापोऽसतां च प्रतिग्रहं स्वाहा
------ [illegible] इति मध्याह्ने ओं सूर्यश्च मेति
रुद्र ऋषिः प्रकृतिश्छंदः आपो देवता अपा

सं
५

मुपस्पर्शने विनियोगः ॐ अग्निश्च मा मन्यु
श्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो र
क्षन्तां यदह्ना पापमकार्षं मनसा वाचा हस्ता
भ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुम्प
तु यत्किंचिद्दुरितं मयि इदमहमापोमृत
योनौ सत्ये ज्योतिषि जुहोमि स्वाहा इति सा
यमाचमेत् ॐ आपो हिष्ठेत्यादि ऋचस्य सि

न्धुद्वीपऋषिः गायत्रीछन्दः आपोदेवता
मार्जने विनियोगः ओं आपोहिष्ठा मयोभु
वः ओं तान ऊर्जे दधातन ओं महेरणाय चक्ष
से ओं योवः शिवतमोरसः ओं तस्य भा
जयतेहनः ओं उशतीरिवमातरः ओं तस्मा
अरंगमाम वो ओं यस्य क्षयाय जिन्वथ ओं
आपोजनयथा चनः ओं द्रुपदादिवेति को

सं ९ 6

किलोराजपुत्रऋषि रनुष्टुपछंदः आपो
देवता सौत्रामण्यवभृथे विनियोगः ॐ
द्रुपदादिवमुमुचानः स्विन्नःस्नातोमला
दिव पूतंपवित्रेणेवाज्य मापःशुंधंतु मै
नसः ॐअघमर्षणसूक्तस्या घमर्षणऋ
षि रनुष्टुपछंदो भाववृत्तं देवतं अश्वमे
धावभृथे विनियोगः ॐऋतंच सत्यंचाभी

द्धा तपसोध्यजायत ततो रात्र्यजायत ततः
समुद्रोऽर्णवः समुद्रादर्णवादधि संवत्स
रोऽजायत अहोरात्राणि विदधद्विश्वस्य
मिषतो वशी सूर्याचंद्रमसौ धाता यथा पू
र्वमकल्पयत् दिवं च पृथिवीं चान्तरिक्ष म
थो स्वः ओं अन्तश्चरसीति तिरश्चीन ऋषिः अ
नुष्टुप्छंदः आपो देवता अपामुपस्पर्शने

विनियोगः अंतश्चरसिभूतेषु गुहायां विश्व
तोमुखः त्वंयज्ञस्त्वंवषट्कार आपोज्यो
तिरसोमृतं ब्रह्मभूर्भुवःस्वरोम् उत्पने
नाचामेत् ततः उत्थाय ॐभूर्भुवःस्वरिति
गायत्र्याऽञ्जलित्रयं सूर्याभिमुखः क्षिपेत्
ॐउदुत्यंजातवेदसमित्यस्य हिरण्यस्तूपऋषिर
गायत्र्यनुष्टुप्छंदः सूर्योदेवता सूर्यो

पस्थानेविनियोगः ॐउद्वयंतमसस्परि
स्वःपश्यंतउत्तरं देवन्देवत्रासूर्य मग
न्मज्योतिरुत्तमम् ॐउदुत्यमिति प्रस्क
ण्वऋषि गायत्रीछंदः सूर्योदेवता सू
र्योपस्थानेविनियोगः ॐउदुत्यंजातवे
दसं देवंवहंति केतवः दृशेविश्वायसू
र्यम् ॐचित्रमित्यस्यकौत्सऋषिः त्रिष्टु

सं.
८

१

षट्छंदः सूर्योदेवता सूर्योपस्थाने विनियो
गः ॐचित्रंदेवाना मुदगादनीकं चक्षुर्मि
त्रस्य वरुणस्याग्नेः आप्राद्यावापृथिवी अं
तरिक्षं सूर्यआत्माजगतस्तस्थुषश्च
ॐतच्चक्षुरित्यस्य दध्यंगाथर्वणऋषिः पु
रुष्णिकछंदः सूर्योदेवता सूर्योपस्थाने वि
नियोगः ॐतच्चक्षुर्देवहितंपुरस्ता च्छुक्र

मुच्चरत् पश्येमशरदःशतं जीवेमशर
दःशतꣳ शृणुयामशरदःशतं प्रब्रवा
मशरदःशतं मदीनाःस्यामशरदःशतं
भूयश्चशरदःशतात् ॐहृदयायनमः
ॐभूःशिरसेस्वाहा ॐभुवःशिखायैवष
ट् ॐस्वःकवचायहुं ॐभूर्भुवःनेत्रत्रया
येवौषट् ॐभूर्भुवःस्वःअस्त्रायफट् इत्यं

सं· ९

गानि त्रिरावर्त्य ॐकारस्य ब्रह्माऋषि र्गा
यत्रीछंदोऽग्निर्देवता शुक्लो वर्णः गायत्री
जपे विनियोगः त्रिव्याहृतीनां प्रजापति
ऋषि र्गायत्र्युष्णिगनुष्टुप्छंदांस्यग्निर्वा
य्वादित्या देवता गायत्रीजपे विनियोगः
गायत्र्या विश्वामित्रऋषि र्गायत्रीछंदः
सविता देवता गायत्री जपे विनियोगः

ॐ तेजोसीति देवा ऋषयः शुक्रं दैवतं
गायत्रीछंदो ॐ गायत्र्यावाहने विनियो
गः ॐ तेजोसि शुक्रमस्यमृतमसि धा
मनामासि प्रियं देवानामनाधृष्टं देव
यजनमसि इति गायत्र्यस्येकपदी द्वि
पदी त्रिपदी चतुष्पद्यपदसि नहि प
द्यसे नमस्ते तुरीयाय दर्शिताय पदा

सं. १० य परोरजसे सावदोमित्युपस्थाय अ
थध्यानं स्वेतवर्णास्सुद्विष्टाकौशेयव
स्त्रानन्यास्यातेविलेपनैः कुत्कौरलंका
रैस्सुभूषिता आदित्यमंडलस्थाचब्रह्म
लोकगताथवा अक्षसूत्रधरादेवीप
द्मासनगताशुभा॥आवाहयेदनुबाने
नतेजोसीतिविधानतः इतिध्यानम्

10

ॐ भूर्भुवः स्वः तत्सवितु र्वरेण्यं भर्गो
देवस्य धीमहि धियो यो नः प्रचोदया
त् इति जप्त्वा प्रदक्षिणीकृत्य विसर्ज
येत् नमो विवस्वते ब्रह्मन्भास्वते वि
ष्णुतेजसे जगत्सवित्रे शुचये सवित्रे क
र्मसाक्षिणे इति सूर्यायार्घ्यदानं भगव
ति सध्ये नमस्स्वस्थानं गच्छ इति संध्याप्र
णा

सं· योगः ॐभूर्भुवःस्वःतत्सवितु र्वरेण्यं
११ भर्गोदेवस्यधीमहि धियोयोनःप्रचो
दयात् तत्सद्ब्रह्म ॥

